अथ शब्दादृयागकारणता, व्यापारं विना तदनुपपत्तेः न च तज्जन्यध्वंसस्य कारणत्वकल्पनमित्युभयमपि जनकम् अन्यत्र तु मानाभावान्न तथेति वाच्यं यागध्वंसस्य यागजन्यस्वर्गं प्रति जनकत्वस्य प्रमाणान्तरविरोधेनार्थापत्त्यकल्पनात्। अस्तु देवताप्रीतिरेव व्यापार इति चेन्न यागस्य देवताप्रीतिहेतुत्वे मानाभावात् गङ्गास्नानादौ देवताविरहेण तदभावात्। न च तत्रापि तत्प्रीतिः, तस्य तत्प्रीतिहेतुत्वे मानाभावात् लाघवेन कर्तृगतव्यापारकल्पनाच्च ननु नायं नियमः, पुत्रगतश्राद्धादिना पितरि, पितृगतजातेष्ट्या पुत्रे चाऽदृष्टोत्पत्तेश्च अथ तत्रापि कर्तर्य्येवाऽदृष्टं, विहितक्रियाया यागस्येव कर्त्तृगतादृष्टजनकत्वात्। न च मुक्ते पुत्रे तददृष्टनाशात् पितरिस्वर्गःस्यादिति वाच्यम् अदृष्टस्य फलनाश्यतया पितरि स्वर्गाभावेनाऽदृष्टानाशात् स्ववृत्तियागजन्याऽदृष्टस्य मुक्तिविरोधित्वात् न तु पितृगतमदृष्टं जन्यते मुक्ते पितरि दोषाभावेन योगिनामिव विहितक्रियायाः, पित्रदृष्टजनकत्वात् तथात्वे च साङ्गमपि श्राद्धादिकं निःफलं स्यादिति तद्विधेरप्रामाण्यापत्तिः पुत्रगताऽदृष्टेन च मुक्तपितरि सुखोत्पत्तौ न विरोधः योगिनामिव सुखोत्पत्तौ दोषस्याहेतुत्वात् अथ पितृसुखं पितृपुण्यजन्यमिति पितरि न पुण्यं तेन विना तदभावात्, न, पुत्रे तत्फलप्रसङ्गात्। पितृस्वर्गकामनाजन्यक्रिया पितृपुण्यहेतुरिति पुत्रक्रियापि तज्जनिकेति चेत् एवं पितृक्रियापितृपुण्यजनिकेति न तं विना पितरि पुण्यं, पुत्रक्रिया च पुत्रपुण्यजनिकेति पुत्रे पुण्यं, पितृस्वर्गकामनाजन्यपुण्यत्वेन पितृस्वर्गहेतुरस्तु तत्पुण्यं पितृवृत्ति तत्सुखहेतुत्वात् न च पुत्रवृत्ति, तत्सुखाहेतुत्वादिति न, तत्पुण्यं न पितृवृत्ति तत्कृत्यजन्यपुण्यत्वात् पुत्रवृत्ति वा तत्कृतिजन्यपुण्यत्वात् तत्कृतपुण्यवत् तस्मात् पितृस्वर्गकामनाजन्यपुण्यत्वेन पितृस्वर्गहेतुतेति पुत्रएव तत्पुण्यमिति, नैवं स्वर्गोपपादकं ह्यपूर्व्वं स्वर्गाश्रये कल्प्यते प्रथमोपस्थितिकत्वेन लाघवात् कल्पनायाः साक्षादुपपादकविषयत्वाच्च। न च स्वर्गहेतुकामनाश्रये, स्वर्गकामनाजन्यक्रियाकर्त्तरि, वा, विलम्बोपस्थितिकत्वात् गौरवात् परम्परया स्वर्गोपपादकत्वाच्च यदि च पुत्रकृतपुण्येन मुक्तस्य शरीराद्युत्पत्तिः सुखं वा स्यात्, तदा साक्षिविषयाऽसत्याभिधानादि पुत्रक्रियाजन्यपापेन ‘स विष्ठायां कृमिर्भूत्वा पितृभिः सह पच्येत” इत्यादिबोधितं नरकभागित्वादि मुक्तस्य पितुः स्यात् तथा च पुत्रकृततथाविधशङ्कया न कश्चिन्मोक्षार्थी ब्रह्मचर्य्यादिदुःखेनात्मानमवसादयेत् “दुःखेनात्यन्तविमुक्तश्चरतीति” “न स पुनरावर्त्तते” इति श्रुतिविरोधश्च तथा च मुक्तस्य सुखदुःखशरीरादिकञ्च भवतीत्यपदर्शनम्। मुक्ते च पितरि श्राद्धादिना दोषाभावादेव नाऽदृष्टमुत्पद्यते न चैवं साङ्गश्राद्धस्यापि निष्फलत्वम् अदृष्टोत्पत्तौ स्वरूपसतो दोषस्याङ्गस्य वैगुण्यात्, यथा विघ्नहेतुदुरितशून्येन कृतं मङ्गलं न पापध्वंसं जनयति स्वरूपसतः पापस्याङ्गस्याभावादिति एवञ्च यागस्यापि व्यधिकरणव्यापारोभविष्यतीति ॥ उच्यते विहितक्रियया कर्त्तृगतव्यापारद्वारा कालान्तरे फलं जन्यत इत्युत्सर्गः स च बलवता बाधकेनापोद्यते प्रकृते च बाधकं नास्ति यथा शास्त्रदेशितं फलमनुष्ठातरीत्युत्सर्गः सुतकृतगयाश्राद्धस्य पितृस्वर्गं प्रति, पितृकृतजातेष्टेः पुत्रपूतत्वादिकं प्रति हेतुत्वस्य शास्त्रेण बोधनात् नन्वयंनियमएव पितृयज्ञजातेष्ट्यादौ परम्परासम्बन्धेन कर्त्तृगतमेव फलं, न हि यस्य कस्यापि पितरि पुत्रे वा फलं किन्तु स्वपितृपुत्रयोः तथा च स्वपितृगतत्वं स्वर्गभागिपितृकत्वं परम्परासम्बन्धः फलेन पुत्रस्य, एवं पूतत्वादिकं पितृगतमेव। न च फलस्य कर्त्तृगतत्वं साक्षात्सम्बन्धेनैवेति वाच्यं ग्रामपशुभूमिहिरण्यादीनां परम्परया कर्तृगतत्वमिति व्यभिचारात् न हि ग्रामादयः कर्त्तरि साक्षात्संबद्धाः। एवं फलस्य साक्षात्कर्त्तृगामित्वबोधने शास्त्रस्योत्सर्गो न तु फलस्य कर्त्तृगामिताबोधने यत्तु स्वर्गभागिपितृकत्वं न फलं तत्कामनाया अधिकारिविशेषणत्वाभावात् ‘पितृस्वर्गकाम’ इत्यादि श्रुतेः स्वतश्च तथा कामनया प्रवृत्तौ फलकामनाविरहेण प्रयोगेऽङ्गवैगुण्यात् फलाभावप्रसङ्गः। किञ्च स्वर्गभागिपितृकत्वं विशिष्टं तत्र विशेष्यं तत्पितृकत्वं न काम्यम् न वा फलं, सिद्धत्वात् तदसाध्यत्वाच्च, किन्तु विशेषणं पितृगतः स्वर्ग इति सएव फलमिति” तन्न न हि स्वर्गभागिपितृकत्वं फलम् अपि तु स्वर्गेण समं पुत्रस्य परम्परासम्बन्धरूपं तदुक्तमिति। उच्यते परम्परासम्बन्धेन यदि पुत्रगतत्वं पितृस्वर्गस्य, तदा संयुक्तसमवायेन तत्पुत्रधनस्यापि फलत्वं स्यात्। सम्बन्धः शास्त्रेण बोध्यत इति चेत् तदा स्वर्गभागिपितृकत्वमपि न तथा, शास्त्रेण बोधितत्वाभावात् ग्रामादिपशुहिरण्यादीनाञ्च सिद्धत्वेन न काम्यत्वं किन्तु तद्विषयकं स्वत्वं काम्यं फलमपि काम्यं तदेव, तच्च साक्षात्कर्तृगतमिति कर्त्तृगतत्वेन फलस्य साक्षात्सम्बन्धोऽपि नियत एव तत्स्वत्वेन फले कामनात्। तस्मात् यथागममेव शास्त्रदेशितं फलम्